National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019 1(25): 131-133
© 2019 NJHSR
www.sanskritarticle.com

डा.गोपीकृष्णन् रघुः
सहायकाचार्यः, संस्कृत-दर्शनविभागः,
रामकृष्णमिशन् विवेकानन्दशैक्षणिक-शोधसंस्था, बेलूरमठः, हौरा,
पश्चिमबङ्गः - 711202

Correspondence:
डा.गोपीकृष्णन् रघुः
सहायकाचार्यः, संस्कृत-दर्शनविभागः,
रामकृष्णमिशन् विवेकानन्दशैक्षणिक-शोधसंस्था, बेलूरमठः, हौरा,
पश्चिमबङ्गः - 711202

# नागेशोक्तसम्बोधनपदार्थः

डा.गोपीकृष्णन् रघुः

## भूमिका

हे राम इत्यादौ प्रातिपदिकार्थापेक्षया सम्बोधनस्य अधिकतया भानात् प्रातिपदिकार्थसूत्रेण प्रथमायाः अप्रवृत्तौ तदर्थं सम्बोधने चेति सूत्रमारब्धम्। सम्बोधनाधिक्ये प्रातिपदिकार्थे वर्तमानात् प्रातिपदिकात् प्रथमेति सूत्रार्थः। अभिमुखीभवनानुकूलव्यापारः सम्बोधनपदार्थः। स च सम्बोधन-विभक्त्यन्तपदघटितवाक्यप्रयोगरूपः प्रयोक्तृनिष्ठः। तस्य चाक्षेपलभ्यत्वेन अनन्यलभ्यः शब्दार्थ इति न्यायेन तत्फलभूतमभिमुखीभवनमेव सम्बोधनविभक्त्यर्थः। प्रागुक्तवाक्यप्रयोगरूपव्यापारफलं प्रयोज्यसम्बन्धिप्रवृत्तिनिवृत्ती देवदत जलमाहरेति प्रवृतिः फलम्। हे देवदत अग्रे सर्पोऽस्तीत्युक्तौ निवृत्तिः फलम्।

चैत्रत्वदेवदतत्यादिरूपसम्बोध्यतावच्छेदकरूपेण सम्बोध्यस्य सिद्धिं विना सम्बोध्यस्य चैत्रादेः सम्बोधनत्वासम्भवात् सम्बोधनविभक्तिः अनुवाद्यविषया । इत्थं सम्बोधनविभक्तेः अनुवाद्यविषयत्वेन राजा भव, युध्यस्व इत्यादौ इदानीं राजत्वस्य असिद्धत्वेन अनुवाद्यत्वाभावात् ततः न सम्बोधनविभक्तिः। सम्बोध्यतावच्छेदकरूपेण यत्र सम्बोध्यस्य सिद्धत्वं तत्रैव सम्बोधनविभक्ति-स्वीकारादेव राजन् भव युध्यस्वेत्यस्य कुमारावस्यायां सम्बोध्यतावच्छेदकीभूतराजत्वस्यासिद्धतया तत्र सम्बोधन विभक्तेरप्राप्तिः। एवं च कुमारावस्थायां राजन् भव युध्यस्वेत्यस्य, राजावस्थायां राजा भव युध्यस्वेत्यस्य च न प्रयोगः।

## सम्बोधनपदार्थः- प्राचीनमतम्

केचितु सम्बोधनपदार्थमेवं कथयन्ति। सम्बोधनं सम्यग् ज्ञापनम्। सम्बोधनशब्दः रूढः इत्यभिप्रायेण पूर्व व्याख्यातम्। यौगिक इति प्राचीना अभिप्रयन्ति। सम्बोध्यज्ञापनार्थमेव सम्बोधनविभक्त्यन्त-पदघटितवाक्यप्रयोगात् सम्बोधनं सम्यग् ज्ञापनमिति वक्तव्यम्। तत्फलं प्रवृत्तिनिवृती। ज्ञापने सम्यक्त्वं च अवश्यकर्तव्यत्वादिविषयकज्ञापनानुकूलत्वम्। तादृशज्ञापनानुकूलव्यापारश्च एतद्विभक्त्यन्तपद-घटितवाक्यप्रयोग एव। राम मां पाहीत्यादौ रामः संबोध्यः। तस्य यत् त्राणादिज्ञापनं तत्फलकं एव तद्वाक्यप्रयोगः। मया यदुक्तं तद् भवता अवश्यं कर्तव्यमित्याद्यर्थविषयकं यत्प्रयोज्यनिष्ठं ज्ञानं तदनुकूलत्वं ज्ञापने सम्यक्त्वम्। अत्र मते सम्यक्त्वं ज्ञापनविशेषणम्।

एवं स्थिते अन्ये सम्यक्त्वं ज्ञापनपदार्थकदेशे ज्ञाने विशेषणमिति वदन्ति। सम्बोधनवि-भक्त्यन्तपदघटितवाक्यं प्रयोक्तुः चैत्रादे या इच्छा देवदत्तः जलमानयतु इतीच्छा। तत्र यः विषयः देवदत्तकर्तृकजलानयनं सः विषयः यस्य तादृशविषयकत्वं प्रयोज्यनिष्ठजाने सम्यक्त्वम्। प्रयोजकवृद्धः देवदत्त! जलमानयेति कथयति । जलाहरणादिकं प्रयोज्यः करोति । अतः तन्निष्ठज्ञाने सम्यक्त्वमपेक्षितम्। अन्यथा अभिमतकार्यं न सिध्यतीत्यभिप्रयन्ति।

तन्न। प्रयोज्यनिष्ठजाने सम्यक्त्वस्य देवदत! जलमाहर इति प्रयोजकप्रयुक्तवाक्यप्रयोगेण अनुमानात् विभक्तिबोध्यतावच्छेदककोटौ निवेशे मानाभावः। सम्बोधनविभक्तिबोध्यं सम्यक् ज्ञापनम्।

तदवच्छेदकं सम्यग्ज्ञानम्। उक्तरीत्या ज्ञाननिष्ठसम्यक्त्वस्य अनुमेयत्वेन अन्यलभ्यत्वात् तस्य न विभक्तिबोध्यत्वम्। किञ्च ज्ञापने एव सम्यक्त्वम्। न तु ज्ञाने। तथाहि सम्बोधनपदाघटिते जलमाहार इति वाक्यप्रयोगेऽपि प्रयोज्यनिष्ठज्ञाने प्रयोक्त्रिच्छाविषयकत्वमनुमीयते। प्रयोज्यनिष्ठज्ञाने प्रयोक्त्रिच्छाविषयकत्वस्य जलमानयेति वाक्यप्रयोगेण अननुमाने सम्बुध्यन्तपदघटितवाक्यस्य प्रयोजकप्र-योक्तृत्वमेव न स्यात्।

अनुमीयमानस्य प्रयोक्त्रिच्छाविषयकत्वस्य विभक्तिबोध्यत्वे मानाभाव इति पूर्वमुक्तम्। इयं रीतिरन्यत्रापि दृश्यते। त्वं पच इति लोडन्तस्थलम्। प्रवर्तना लिङर्थः। न तु इष्टसाधनम्। प्रवर्तनया तदनुमीयते। पाकः मदिष्टसाधनमिति इष्टसाधनत्वं प्रयोज्यस्य पाकादौ स्वीकार्यम्। पाकः इष्टसाधनम्, प्रवर्तनाविषयत्वात् इत्यनुमानम्। प्रवर्तनानुमेयत्वात् इष्टसाधनत्वं न लिङर्थः। तद्वत् प्रकृतेऽपि देवदत जलमाहरेति वाक्यप्रयोगात् प्रयोज्यज्ञाने प्रयोक्त्रिच्छाविषयत्वमनुमीयते। हेशब्दप्रयोगः तदर्थे तात्पर्यग्राहकः। सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः इत्यादौ अचेतनसम्बोधनस्थले अचेतने चेतनत्वारोपेण गौणः प्रयोगः।

सम्बोधन अनभिमुखमभिमुखीकृत्य अज्ञातार्थज्ञानानुकूलव्या-पारानुकूलव्यापारः। अज्ञातः योऽर्थः जलाहरणरक्षणादि तद्विषयक यज्ज्ञानं प्रयोज्यनिष्ठं ज्ञानं जलमाहरणीयम्, रक्षणीयम् इत्याकारकं ज्ञानम्, तदनुकूलव्यापार चैत्र जलमाहरेति वाक्यश्रवणरूपः व्यापारः, तदनुकूलः व्यापारः प्रयोक्तृनिष्ठः शब्दप्रयोगरूपः। तद्व्यापारजन्यज्ञानानुकूलव्यापाराश्रयत्वं सम्बोध्यत्वम्। तद्व्यापारः प्रयोजकनिष्ठः यः शब्दप्रयोगरूपः व्यापारः। तज्जन्यं यत् ज्ञानं मया जलाहरणं कर्तव्यं मया रक्षणं कर्तव्यम् इत्याकारकं ज्ञानम्। तदनुकूलः व्यापारः प्रयत्नादिः, तदाश्रयत्वम्। स एव आहरणरक्षणादिरेव ज्ञाप्यः अर्थः। तेन राम त्रायस्वेत्यादौ रामरूपः यः सम्बोध्यः तन्निष्ठ-सम्बोधनविषयः त्राणमिति प्राचीनमतरीत्या बोध्यः। अभिमुखी-करणशब्दप्रयोक्तुः वचनार्थग्रहणे प्रयोज्यस्य सादरत्वकरणम्। सादरत्वव्यञ्जकं च मुखपरावृत्यादि। क्रियाप्रयोगाभावे है राम त्वं सुन्दरः इत्यादौ असीत्यध्याहारः। इत्थं क्रियाध्याहारेण सम्बोधनविभक्तेः साधुत्वे च धिङ् मूर्खेत्यादौ क्रियाध्याहारे प्रथमा। तदभावे द्वितीयेत्याहुः।

**सम्बोधनपदार्थः- नागेशमतम्**

इदं मतं सिद्धस्याभिमुखीभावेत्यादिहरिग्रन्थविरुद्धम् इति नागेशः। सम्बोधनमभिमुखीभावः तत्फलं प्रवृत्तिनिवृत्ती। तेन सम्बोधनविभक्तिः अनुवादविषयेति पूर्वमुक्तम्। स्वीयमते हरिं प्रमाणयति ।

**सम्बोधनपदं यच्च तत् क्रियायां विशेषणम्।**
**व्रजानि देवदतेति निघातोऽत्र तथा सति ।।** इति हरिः ।

सम्बोधनपदं यत् तत् स्वार्थद्वारा धातूपस्थाप्यभावना-रूपक्रियाया व्यधिकरणविशेषणम्। व्रजाति देवदतेति उदाहरणे देवदत्तस्य वजनक्रियायाश्च नास्ति सामानाधिकरण्यम्। अतः तस्य तत्र व्यधिकरणविशेषणत्वम्। तथा सति = उक्तरीत्या विशेषणत्वे सति अत्र व्रजानि देवदतेत्यादौ आमन्त्रितस्य चेति आष्टमिकनिघातः सिध्यति।

आख्यातं सविशेषणं वाक्यमिति समर्थसूत्रभाष्ये वाक्यलक्षण-मुक्तम्। सम्बोधनपदार्थस्य क्रियाविशेषणत्वाभावे वाक्यलक्षणा-नाक्रान्तत्वात् समानवाक्ये इति प्रकृत्य विहितः निघातः व्रजानि देवदतेत्यादौ न स्यात्। सम्बोधनविभक्तेः अनुवाद्यविषयतया अनुवाद्यस्य च विधेये एवान्वयेन विधेयताया च क्रियानिष्ठत्वेन तस्यामेवान्वय इति युक्तम् । सम्बुध्यन्तस्य क्रियायामेवान्वय इति न डिसम्बुद्ध्योः (8-2-8) इति सूत्रभाष्ये ध्वनितः। ङौ सम्बुद्धौ च नस्य लोपो न स्यादिति सूत्रार्थः। तत्र सूत्रे भाष्ये तस्मान्नार्थः ङिग्रहणेनेति सूत्रे ङिग्रहणस्य प्रयोजनं निरस्य ततः सम्बुद्ध्यर्थेन चापि नार्थः इति सम्बुद्धिग्रहणस्यापि प्रयोजनं निरस्यते। सम्बुद्ध्यन्तानामसमासः राजवृन्दारकेति । इह तावत् समानार्थेन वाक्येन भवितव्यं समासेन च। यश्चेहार्थः वाक्येन गम्यते नासौ जातुचित् समासेन गम्यते। अवयवसम्बोधनं वाक्येन गम्यते। समुदायसम्बोधनं समासेनेति। हे राजन हे वृन्दारक इत्यनयोः सम्बुध्यन्तयोः गच्छेत्यादिक्रिया-यामेवान्वयेन परस्परमनन्ययात् एकार्थीभावाभावात् तयोर्न समास इति भाष्याशयः। अनेन सम्बुद्ध्यन्तस्य क्रियायामेवान्वय इति ध्वन्यते।।

सम्बुध्यन्तस्य क्रियायामन्वये वाक्यपदीयकारं प्रमाणयति। यथा -

**सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।**
**प्राप्तस्याभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते।।** इति।

प्रथमपादेन सम्बोधनस्वरूपं, द्वितीयपादेन तस्य क्रियायामन्वयः उक्तः। सिद्धस्य = सम्बोध्यतावच्छेदकरूपेण सिद्धस्य। अभिमुखी-भावमात्रमित्युक्तत्वेन सम्बोधनपदार्थफलभूतः अभिमुखीभाव एवात्र सम्बोधनपदार्थ इति स्पष्टं भवति। सिद्धस्येत्यनेन सम्बोधन-स्यानुवाद्यत्वं, विनियुज्यते इत्यनेन प्रवर्तनाविषयक्रियासंबन्धः तस्येति बोधितम्। एवं च अभिमुखीभवद्रामायुद्देश्यक-प्रवर्तनाविषयः रक्षणमिति सिद्धान्ते बोधः। व्रजानि देवदत्तेत्यादावपि वाक्यैकदेशन्यायेन जानीहि इत्यध्याहारः। ज्ञाधात्वर्थे कर्मत्वेनान्वयः। सम्बोधनविभक्तेः अनुवाद्यविषयतया तदर्थस्य विधेये ज्ञाधात्वर्थक्रियायामुद्देश्यत्वेनान्वयः। व्रजानि देवदत इत्यनयोः समानवाक्यस्थत्वम्। व्रजानि देवदतेत्यत्र प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति सूत्रेण प्राप्तकाले लोट्। हे देवदता व्रजनस्य मम व्रजनस्य कालः प्राप्त इत्यर्थः।

**उपसंहारः**

अनेन प्रकारेण प्राचोक्तं सम्बोधनपदार्थं निरस्य हर्याद्यभमतमर्थं निरूपयति नागेशः। प्राचीनाः यौगिकोऽयं शब्दः येन अनभिमुखम-भिमुखीकृत्य अज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारः तस्य अर्थः भवति इति वदन्ति। किन्तु नागेशः रूढोऽयं शब्दः येन अभिमुखीभवनानुकूलव्यापारः तस्य अर्थः भवति इति वदति। भाष्यकार-हर्यादीनामपि तदेवाभिमतमिति प्रमाणपुरस्सरं निरूपयति च।

**परिशीलितग्रन्थसूचिः**


1.व्याकरणमहाभाष्यम्, आचार्य गुरुप्रसाद् शाास्त्री, प्रतिभा-प्रकाशान्, नई दिल्लि,1999

2.वैय्याकरणसिद्धान्तकौमुदी, परमेश्वरानन्दशार्मा, मोत्तिलाल् बनारसीदास्, वाराणसी, 2000

3.कारकप्रकरणम्, रामरङ्गशार्मा, भारतीयविद्याप्रकाशानम्, नई दिल्लि,1997

4.वैय्याकरणसिद्धान्तलघुमञ्जूषा,माधवशाास्त्री भण्डारी, चौखम्बा संस्कृत सीरिस्, वाराणसी,1989

5.कारकमीमांसा, मोत्तिलाल् जोशाी, राजस्थानसंस्कृतसम्मेलन्, जयपूर, 2001

6.वैय्याकरणभूषणसारः, पं.चन्द्रिकाप्रसादद्विवेदी, चौखम्बा सुरभा-रतीप्रकाशान्, 2001